ग्रं.नं. २३२ नं. १५

स्तोत्र

शीतलास्तोत्र

२५८/स्तो. २२०

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1) श्रीगणेशाय नमः॥ शितळादेव्यैनमः॥ सजलज
लदश्यामांरक्तमाल्यानुलेपनां॥ तुंगस्तनीविशाला
क्षीनानालंकारभूषितां॥१॥ लसन्नीतंबबिंबोष्ट्यां
वरारूढांसुशोभनां॥ हस्ताभ्यांमार्जनीसूर्पंदधा
नांनग्निकांस्मरेत॥२॥ मार्जन्यामार्जितान्
स्फोटान्रोगानन्यांश्चदारुणान्॥ सूर्पेकृत्वाभ।
सिक्षारप्रक्षिपंतीमुहुर्मुहुः॥३॥ इतिध्यानमंत्रं॥ अ
थस्तोत्रं॥ स्कंदउवाच॥ भगवन्देवदेवेशीशीतला
यास्तवंशुभं॥ वक्तुमर्हस्यशेषेणविस्फोटकभया

(२)

॥२॥ शुभं ॥४॥ ईश्वरउवाच ॥ नमामिशीतलांदेवींरास
भस्थांदिगंबरां ॥ मार्जनीकलशोपेतांशूर्पालंकृत
मस्तकां ॥५॥ वंदेहंशीतलांदेवींसर्वरोगभयापहं ॥
मायासार्धनिवर्तेतविस्फोटकभयंमहत् ॥६॥ शी
तलेशीतलेचेतियोब्रूयाद्दाहपीडितः ॥ विस्फोट
कभवोदाहःक्षिप्रंतस्यप्रणस्यति ॥७॥ यस्त्वामुद ॥२॥
कमध्येतुधृत्वासंपूजयेन्नरः ॥ विस्फोटकभयंघो
रंगृहेतस्यनजायते ॥८॥ शीतलेज्वरदाधस्यपूति
गंधस्यनस्यच ॥ प्रनष्टःचक्षुषःपुंसस्त्वामाहुर्जीव

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2A)

मोषधं॥९॥शीतलेतनुजारोगान्नृणांहरसिदुस्सजा
न्॥कैविस्यं स्फोटकविशीर्णानां त्वमेकाम्टतवर्षि
णी॥१०॥गलगंडग्रहारोगायेचान्येदारुणान्नृणां॥
त्वदनुध्यानमात्रेण शीतलेयांतिसंक्षया॥११॥नमं
त्रंनोषधंकिंचित्पापरोगस्यविद्यते॥त्वमेकशीतले
धात्रींनान्यांपश्यामिदेवतां॥१२॥म्टणालतंतुस
दृशींनाभिहृन्मध्यसंस्थितां॥यस्त्वांसंचिंतयेद्दे
वीं तस्यम्टत्यूर्नजायते॥१३॥अगदंकारनिर्दिष्टा
उपायाअपिकोटिशः॥निःफालास्युर्जगन्मात

॥२॥ (3)

स्फुष्टायां चापि शीतले ॥१४॥ तार्क्ष्यपक्षाहनित्रस्ताः
पलायंते यथा हयः ॥ तथा त्वं स्मृतिमात्रेण शीतले
स्फोटजामयः ॥१५॥ घोरः शरीरजो दाहः पीडा वि
स्फोटजोद्भवः ॥ न तस्य जायते यो वै शीतलां शरणं
गतः ॥१६॥ शीतले त्वं जगन्माता शीतले त्वं जगत्पि
ता ॥ शीतले त्वं जगद्धात्री शीतलायै नमोऽस्तु ते ॥१७॥
श्रोतव्यं पठितव्यं च श्रद्धाभक्तिसमन्वितः ॥ उपस
र्गविनाशाय परं स्वस्त्ययनं महत् ॥१८॥ अष्टकं शी ॥२॥
तलादेव्या यः पठेन्मानवः सदा ॥ विस्फोटकभयं घो

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com